# Rashtra Sandeshah

# राष्ट्रसन्देशः

## Document Information

Text title : Rashtra Sandeshah

File name : rAShTrasandeshaH.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# राष्ट्रसन्देशः

(गीतिका) (प्रमाणिका वृत्तम्)
विकासतां प्रकाशतां
स्वदेश एष राजताम् ।
ज्वलत्प्रताप-रोचिषां
दिगन्त-व्याप्त-कीर्तिभाक् ॥ विकासता० ॥

स्फुरद्-दहत् त्विषा दहेद्,
अराति-वृन्द-वाहिनीम् ।
स्वतन्त्र देश-भारतो
विभा-रतो विभासताम् ॥ विकासता० ॥

धरा प्रपीडिता रुपा,
समस्त-आङ्ग्ल शासकैः ।
हृता मृतेव चोज्झिता
न सान्त्वना-ध्वनि श्रुतः ॥ विकासता० ॥

विदेश-चोर-लुण्ठकैः,
चिराय तापिता मही ।
स्वदेश-वीरमात्मजः
स्व-रक्षणं प्रयाचते ॥ विकासता० ॥

नहीदृशः क्वचित् सुखं
यथा स्वमातृ-तर्पणम् ।
स्वमातृभूमि रक्षणं
स्वदेश शक्तिपोषणम् ॥ विकासता० ॥

स्वदेश-बन्धु पोषणं
स्व-राष्ट्र-शत्रु-शोषणम् ।
स्वमातृभूमि-तोषणं

सदा सुखं मुदावहम् ॥ विकसता० ॥

यदीष्टमात्म गौरवं
स्वदेश-मान-रक्षणम् ।
स्वदेश-केतु-सारणं
तदा भजस्व मातरम् ॥ विकासता० ॥

उपास्य क्रान्ति-पद्धतिं
अपास्य दोष-संहतिम् ।
निरस्य दैन्य-दानवीं
सृतिं श्रयस्व मानवीम् ॥ विकासता० ॥

श्रमाश्रया सृति शुभा
गुणावहा मति शुभा ।
गति शुभा सुखावहा
कृति शुभा मुदावहा ॥ विकासता० ॥

स्व-जीवनं समर्प्यतां
स्वमातरं च रक्ष्यताम् ।
स्व-भारतं प्रपोष्यतां
हुतात्मनश्च तोष्यताम् ॥ विकासता० ॥

Proofread by Mandar Mali

*Rashtra Sandeshah*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*